# SANSKRIT

## First Paper (भारतीय धर्म एवं दर्शन)

Time Allowed : Three Hours | Maximum Marks : 100

1. निम्नाङ्कितेषु कयोश्चिद् द्वयोः सप्रसङ्गव्याख्या करणीया- $7\frac{1}{2}\times7\frac{1}{2}$

   (क) द्रव्यगुणकर्मसामान्यविशेषसमवायाऽभावाः सप्त पदार्थाः।

   (ख) ज्ञानाऽधिकरणमात्मा।स द्विविधः परमात्मा जीवात्मा चेति।

   (ग) श्रोत्रग्राह्यो गुणः शब्दः आकाशमात्रवृत्तिः। स द्विविधः ध्वन्यात्मको वर्णात्मकश्च।

   (घ) यत्र-यत्र धूमः तत्राग्निरिति साहचर्यनियमो व्याप्तिः।

2. अधोलिखितेषु केषाञ्चन पञ्चप्रश्नानाम् उत्तराणि देयानि- 5×2

   (क) कर्म लक्षणं विलिख्य कर्मणः भेदाः सविशदं व्याख्यायताम्।

   (ख) मनसः लक्षणं सभेदं प्रतिपाद्यताम्।

   (ग) बुद्धे सलक्षणं विलिख्यताम्।

   (घ) ''कार्यनियतपूर्ववृत्ति कारणम्'' विविच्यताम्।

   (ङ) ''परामर्शजन्यं ज्ञानमनुमितिः'' कथमिति निगद्यमात्।

   (च) कतिविधाः संस्काराः? तेषां स्वरूपं विलेख्यम्।

http://questionpaperesult.com

Scanned by CamScanner

(छ) स्मृतेः लक्षणं तद्भेदाश्च वर्ण्यताम्।

(ज) "तद्वतितत्प्रकारकोऽनुभवः यथार्थः" इत्यत्र सोदाहरणं विविच्यताम्।

(झ) के पञ्चावयवाः? सोदाहरणं प्रतिपाद्यताम्।

3. निम्नाङ्कितयोः ससन्दर्भव्याख्या करणीया- $7\frac{1}{2}\times7\frac{1}{2}$

(क) नासतो विद्यते भावो नाभावो विद्यते सतः
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः।।

अथवा

अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः।
अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत।।

(ख) जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च।
तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि।।

अथवा

योगस्थः कुरु कर्माणि संगं त्यक्त्वा धनञ्जय।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते।।

4. अधोलिखितेषु केषाञ्चन पञ्चप्रश्नानां समुत्तराणि स्वसंस्कृतगिरा लिखत- 5×2

(क) "न हन्यते हन्यमाने शरीरे" श्लोकं पूरयत।

(ख) "न चैनं क्लेदयन्त्यापः" शब्दार्थो विलेख्यः।

(ग) स्थितधीः किं प्रभाषेत?

(घ) कः शान्तिमधिगच्छति?

(ङ) आत्मनः नित्यता-विषये एकश्लोकः

(च) स्थितप्रज्ञस्य लक्षणं किम्?

(छ) "अशान्तस्य कुतः सुखम्" इत्यत्र ससन्दर्भतात्पर्यो विलेख्यः।

(ज) ध्यायतो विषयान् पुंसः कथं प्रणश्यति।

5. निम्ननिर्दिष्टेषु सूत्रेषु भाष्यमाधृत्य सूत्रद्वयस्य व्याख्या कार्या- $7\frac{1}{2}\times7\frac{1}{2}$

(क) वृत्तयः पञ्चतय्यः क्लिष्टाक्लिष्टाः

(ख) तस्य वाचकः प्रणवः।

(ग) वीतरागविषयं वा चित्तम्।

(घ) प्रत्यक्षानुमानागमाः प्रमाणानि।

(ङ) अनुभूतविषयासम्प्रमोषः स्मृति।

6. अधोलिखितेषु केषाञ्चन पञ्चप्रश्नानामुत्तराणि संस्कृतभाषायां लिखत- 5×2

(क) कस्य निरोधः कर्त्तव्यः?

(ख) ईश्वरस्य विषयकं सूत्रं विलेख्यम्।

(ग) वस्तुशून्यो विकल्पः कः?

(घ) "वीतरागविषयं वा चित्तम्" सूत्रस्य अर्थो विलेख्यः।

(ङ) योगदर्शनमाश्रित्य "ऋतम्भरा" शब्दस्य अर्थो लेख्यः।

(च) "वृत्तिर्निद्रा" विषये किं सूत्रम्?

(छ) योगाभ्यासः कः?

(ज) योगदर्शने "अनुशासनम्" शब्दस्य तात्पर्यो विलेख्यः।

http://questionpaperesult.com

Scanned by CamScanner

(झ) "वशीकारसंज्ञा वैराग्यम्" सूत्रं प्रपूरयत।

7. निम्नाङ्कितेषु त्रयाणां श्लोकाना व्याख्या करणीया- 5×3

(क) वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च।।

(ख) श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः।
ते सर्वार्थेष्वमीमांस्ये ताभ्यां धर्मो हि निर्बभौ।।

(ग) वैदिकैः कर्मभिः पुण्यैर्निषेकादिर्द्विजन्मनाम्।
कार्यः शरीरसंस्कारः पावनः प्रेत्य चेह च।।

(घ) स्त्रीणां सुखोद्यमाक्रूरं विस्पष्टार्थं मनोहरम्।
मङ्गल्यं दीर्घवर्णान्तमाशीर्वादाभिधानवत्।।

(ङ) वैवाहिको विधिः स्त्रीणां संस्कारो वैदिकः स्मृतः।
पतिसेवा गुरौ वासो गृहार्थोऽग्निपरिक्रिया।।

(च) एकाक्षरं परं ब्रह्म प्राणायामः परं तपः।
सावित्र्यास्तु परं नास्ति मौनात् सत्यं विशिष्यते।।

8. अधोलिखितानां केषाञ्चन पञ्चप्रश्नानाम् उत्तराणि लिखत- 5×2

(क) के सङ्कल्पजाः स्मृताः? (ख) वेदे सर्वज्ञानमयो हि कः?

(ग) धर्मस्य लखणं लिखत। (घ) धर्मज्ञानं किं विधीयते?

(ङ) गुरोः कर्त्तव्यं विलिखत। (च) कुशलं कथं पृच्छेत्?

(छ) वित्तादि-पञ्चानां स्थानं लिखत।

(ज) कः नो महान् समाजे? (झ) "नारीधर्मः" कथं व्याचक्षते मनुः?

http://questionpaperesult.com

Scanned by CamScanner